॥ श्रीः ॥

" यान्यस्माकꣳ सुचरितानि तानि त्वयोपास्यानि

॥ पुरुषार्थमीमांसा ॥



श्रुतिमूलः स्मृतिस्कंधः सदाचारसुमोज्वलः ॥
धर्मकल्पतरुर्जीयात्पुरुषार्थफलप्रदः ॥

इह खलु सर्वेषां मानुषाणामिष्यमाणतयाऽवगतेषु पुरुषार्थेषु प्रवृत्तिर्नैसर्गिकी । सा प्रवृत्तिरविगीता पुंसां निखिलश्रेयस्साधनाय कल्पते ॥ विभिन्नरुचीनां लोकानां पुरुषार्थप्रवृत्तयोऽपि नानाप्रकाराः । विशिष्टसंस्कारोपेतांतःकरणानुरूपा मनुष्याणामभिरुचिः ॥ सा यद्यनवस्थिता तदा लोकमर्यादा विपर्यस्ता भवेदिति लोकतः शास्त्रतश्च काऽपि व्यवस्था सर्वेषामावश्यकी भवति । पौरुषेयीमपौरुषेयीं वा व्यवस्थामाश्रित्य पुरुषार्थसाधनाय प्रयतंते ॥ महापुरुषैरनुष्ठीयमानो धर्मः प्रचयं गमिष्यति । धर्मस्वरूपनिरूपणं हि नानाशाखासु विप्रकीर्णत्वेन कालदेशादिभेदेन व्यवस्थानामानंत्येन नानाप्रकरणस्थत्वेन च दुरवगाहमतिसूक्ष्मं च तदत्र शास्त्राण्येव प्रमाणम् । उक्तं च भगवता (गी. १६ अ. श्लो. २४) 'तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थिता' विति ॥ शास्त्राणि पुरुषं धर्मे प्रवर्तयंति निव-

र्त्तयंति चाधर्मात् ॥ प्रवृत्तिप्रयोजको विधिः । निवृत्तिप्रयोजकः प्रतिषेधः । विधिप्रतिषेधौ शास्त्राचार्योपदेशनयलोकवृत्तादिविज्ञानेन सम्यग्विज्ञाय पुरुषार्थसाधनाय प्रयतितव्यम् ॥ अज्ञाते अन्यथा ज्ञाते वा पुरुषार्थस्वरूपे न किमपि प्रयोजनं भवति । परमार्थदर्शिनः पुरुषाः परस्परानुबंधिषु पुरुषार्थेषु यथायोगं प्रवृत्ताः परां सिद्धिमुपयांति ॥ अत्र केचन सुखहेतुत्वादर्थकामावेव श्रेयो मन्वते ॥ अपरे कामहेतुतामवष्टभ्य धर्मार्थौ श्रेयो विजानंति ॥ अर्थ एव धर्मकामयोस्साधनमिति तमेव परमार्थमाचक्षते मनीषिणः कतिचन ॥ आचार्याः केचन धर्म एवार्थकामयोर्मूलमिति व्यवस्यंति ॥ अनाद्यविद्यावासनया कृतकामकर्मवशादुच्चावचेषु जन्मसु परिभ्रमतो जीवराशेः कदाचित्स्वकृतकुशलकर्मणा लब्धे मानुष्यके यथाविधि साधितेन त्रिवर्गेण शुद्धसत्वस्य कर्मबंधनिवृत्तिलक्षणो मोक्ष एव परमार्थस्तत्साधनद्वारा धर्मार्थकामरूपस्य त्रिवर्गस्यापि पुरुषार्थत्वमिति प्रकाशयंति शास्त्ररहस्यमन्ये ॥ एवं यथाभिलाषं विप्रतिपन्नेपि पुरुषार्थविचारे परस्पराविरोधिनश्चत्वारः पुरुषार्थाः श्रेयोभ्युदयहेतव इति सर्वेषामपि प्राज्ञानामभिमतम् ॥ यथा विजिज्ञासितस्यास्यैवार्थस्याभिव्यक्तिर्भवेत् तथैवेयमारभ्यते पुरुषार्थमीमांसा ॥

पुरुषार्थाश्चत्वारो धर्मार्थकाममोक्षाः । एतेषु धर्मार्थकामानां त्रिवर्गसंज्ञया व्यवहारः । समोक्षाणामेषां चतुर्वर्ग इति च ॥ पुरुषार्थसाधनाय प्रयतमानेन सांगानि सरहस्यानि तत्प्रमाणान्यध्येतव्यानि ॥ उपासनीया ज्ञानवृद्धा गुरवः ॥ स्वयं च श्रद्धास्तिक्यपूतमानसेन भाव्यम् ॥ कामात्मानो हेतुवादपरा नास्तिकाश्च नाधिक्रियंते शास्त्रेषु । प्रभुसंमितानि शास्त्राणि विकल्पासहानि ॥ लौकिकालौकिकोपायबोधकानि तान्यान्वीक्षिकी त्रयी वार्ता दंडनीतिरिति चत्वारि ॥ आन्वीक्षिक्यां जीवस्य स्वरूपानंदाविर्भावलक्षणमोक्षोपायः । त्रय्यां धर्माधर्मविवेकः । वार्तायां कृषिवाणिज्यपाशुपाल्यप्रमुखवृत्तिनिरूपणम् ॥ दंडनीत्यां लोकयात्रानिर्वहणोपायः ॥ एष्वेव प्रतिष्ठितास्सर्वे पुरुषार्थाः ॥

इतराण्यपि शास्त्राणि साक्षात्परंपरया वा बहूपकुर्वंति पुरुषार्थानाम् ॥ पुरुषार्थसाधकानां शास्त्रविज्ञानं सहजः प्रबोधः क्रियासु दाक्ष्यं देशकालानुरोधः सूनृता वाणी स्थिरस्संकल्पः प्रतिभा चेति लोकमान्या गुणाः काममापूरयंति त्रिवर्गस्य लौकिकमलौकिकं चेति द्विविधं फलम् ॥ तत्र प्रथमोदिष्टं लोकयात्रानिर्वहणोपयोगि भवति ॥ शारीरमानसबलवृद्धिरात्मरक्षणं विहितवृत्या जीविकालाभः स्वकुटुंबरक्षणं परोपकृतिः सामा-

जिकव्यवहारो नीत्यनुरोधः पापान्निवृत्तिरित्यादयस्सर्वेषामैहिकसुखहेतवः शास्त्रनिर्दिष्टा यथाविध्यनुष्ठातारं सुकृतैर्वर्धयंति ॥ द्वितीयं तु जन्ममरणलक्षणसंसारपरिश्रांतस्य जीवस्य स्वर्गापवर्गसाधकम् ॥ एतदेवैहिकमामुष्मिकं फलं मनुपराशरादिभिर्महामुनिभिर्धर्मशास्त्रेषु प्रपंचितम् ॥ चतुर्षु पुरुषार्थेषु धर्मस्यैव प्राधान्यम् । अर्थकामावपि धर्मस्यैवांगभूतौ ॥ केवलभोगार्थयोरनयोर्न पुरुषार्थत्वम् । शास्त्रेषु विनिंदितत्वात् ॥ अतः धर्मस्य पुरुषार्थेष्वभ्यर्हितत्वात् तत्स्वरूपलक्षणप्रामाण्यविभागादीन् विचारयामः ॥ 'श्रुतिचोदितक्रियाजन्यो निखिलश्रेयोभ्युदयहेतुरपूर्वाख्यो गुणो धर्मः । यमार्याः क्रियमाणं प्रशंसंति स धर्मः' इत्यादीनि धर्मलक्षणानि श्रुतिमूलकतयैव प्रामाण्यं धर्मस्य कथयंति ॥ एतेन पौरुषेयीं कांचन व्यवस्थामाश्रित्य प्रवृत्तेषु चैत्यवंदनकेशोल्लुञ्छननग्नस्नानादिरूपेषु शाक्यादिधर्माभासेषु श्रुतिमूलकत्वाभावात् धर्मत्वं प्रत्यादिष्टम् । ननु 'शाक्यादयः क्षत्रियाः श्रुतिविदः । तत्प्रणीतागमानामपि श्रुतिमूलकतया प्रामाण्यमव्याहतं तन्मूलभूतश्रुतीनामिदानीमुत्सन्नप्रच्छन्नत्वेनानुपलंभा' दिति चेन्मैवम् ॥ वेदाप्रामाण्यवादिनां तेषां धर्मस्य वेदमूलकत्वकल्पनानौचित्येन तदसंभावितमेव ॥ नच पापीयसीं योनिमापन्नानां संकरजातीनां कैवर्तभिल्लपुल्कसा-

दीनां श्रुत्यनर्हाणां तत्तत्कुलीनमहापुरुषाचरितधर्मेणैव चारितार्थ्यं दृष्टम् । भगवान्बादरायणोपि (भागवते ७ स्कंधे १४ अध्याये) "स्वभावविहितो धर्मः कस्य नेष्टः प्रशांतये" इति प्रत्यपीपदत् । उक्तं च भगवता (गीतायां १८अ.) "स्वभावविहितंकर्म सदोषमपि न त्यजेत्" इति । तस्मात्स्वभावविहितधर्मस्य श्रुतिचोदनाभावादिदं लक्षणमव्याप्तमिति वाच्यम् ॥ धर्मविभागापरिज्ञानमूला भ्रांतिरियं यदुच्यते विहितकुलाचारेण चारितार्थ्यमिति ॥ स हि वृत्तिधर्मतया विहितः ॥ लोकयात्रानिर्वाहाय वृत्तिधर्मोपि श्रुतिचोदित एव ॥ मन्वादयो महर्षयो मंत्रद्रष्टारस्तमर्थं स्मृतिषु निबबंधुः । नहि वितथगिरो महामुनयः ॥ तस्मिन्नपि वृत्तिधर्मे यावदर्थपरिग्रहादिधर्मेण वर्तमानानामष्टाभिरात्मगुणैर्दया क्षांति रनसूया शौचमनायासो माङ्गल्यमकार्पण्यमस्पृहेतिगौतमादिप्रतिपादितैर्निर्व्यूढवृत्तानामस्त्येव कोप्युत्तरोत्तरमकृष्टजन्महेतुर्धर्मइति संप्रतिपन्नमेव विदुषाम् ॥ तत्तत्कुलीना अपि महापुरुषा निर्वैररागाः प्रशांतहृदयाः कमपि धर्मं सूक्ष्मेक्षिकया विचार्य जीविकानिर्वाहाय निरूपयामासुः ॥ यथा लोकयात्रा न विपद्येत यथा धर्मः स्वनुष्ठितो भवेत् तथैव प्रवर्तते महाजनाः ॥ रजस्तमःप्रकृतयो वृत्तिकर्शिता हिंसाचौर्यादिषु यथा न प्रवर्तेरन् तथा लोकरक्षणाय सर्वे

नियमास्समारब्धाः ॥ तमेतमर्थमभिसंधायैव भगवान्मनुरपि 'विद्वद्भिस्सेवितः' 'हृदयेनाभ्यनुज्ञातोयोधर्म' इति धर्मलक्षणमभाणीत् द्वितीयाध्याये ॥ तस्माल्लोकद्वयाविरोधिनां सर्वेषामपि धर्माणां वेदमूलकतयैव प्रामाण्यनिर्वाहान्नोक्तदोषप्रसंगः ॥ धर्मज्ञापकहेतवः श्रुतिः स्मृतिः सदाचारः अविगीतात्मेच्छेति चत्वारः परस्परानुबंधिनः श्रेयोभ्युदयहेतवः ॥ सदाचारः सर्वधर्ममूलम् ॥ उक्तलक्षणो धर्मो द्विविधः ॥ साधारणो विशिष्टश्चेति ॥ तत्र साधारणो याज्ञवल्क्यादिभिरुपदर्शितः । अहिंसा सत्यम् अस्तेयम् शौचम् इंद्रियनिग्रहः दानं दया दमः क्षांतिरिति सर्वेषां साधारणः ॥ विशिष्टस्तु श्रौतः स्मार्तश्चेति द्विविधः । सोमसंस्थादिः श्रौतः ॥ तदुपयोगी स्मार्तस्तु वर्णधर्मः आश्रमधर्मः वर्णाश्रमधर्मः गुणधर्मः निमित्तधर्मश्चेति पंचविधस्त्रैवर्णिकमात्रविषयः ॥ इतरेषामपि सत्यलौकिकोपायबोधार्थित्वे हेत्वंतरेण निषेधदर्शनान्न तत्राधिकारः । यस्मिन्नविच्छिन्ना गर्भाधानादयो वैदिकास्संस्कारा यथाक्रमं निर्वृत्ताः स द्विजो विहितेषु धर्मेष्वधिकारी भवति ॥ द्विजशरीरं वैदिकसंस्कारैस्संस्कृतमुपचितगुणं भवति ॥ यथा दोहदेन गुणाधिक्यं तरूणाम् ॥ अस्तु वा तादृक्संस्कारः शूद्रस्यापीति चेत् ॥ न चायमर्हति वैदिकं संस्कारं योग्यताभावात् । केव-

लरजस्तमःप्रकृतीनां सत्वैकसाध्यानि कर्माणि दुश्शकानि ॥ श्रद्धामयः पुरुषस्तदनुरूपमेव कर्मारभते ॥ इदं च प्रतिपादितं भगवता (गीतायां १९ अ.) "सत्वानुरूपा सर्वस्य श्रद्धा भवति भारते"त्यादिभिः ॥ नहि शक्यं प्रकृतिमन्यथा कर्तुं व्यापारशतैरपि ॥ द्रव्याणां सुसूक्ष्मः कश्चिद्विलक्षणः परिणामविशेषः संस्कारसाध्यः ॥ तद्विशेषं सर्वज्ञकल्पा मंत्रार्थरहस्यवेत्तारो मुनयो विजानते ॥ नियोगपर्यनुयोगपदमतिक्रामंति महतां शासनानि ॥ वयमिह तदादेशकारिणः केवलम् ॥ अपरे छांदसाः पुनर्गायत्र्या ब्राह्मणमसृजत् त्रिष्टुभा राजन्यं जगत्या वैश्यम् न केनापि शूद्रमिति श्रुतिमवलंब्यच्छन्दसां स्रष्टानां त्रैवर्णिकानामेवच्छांदसस्संस्कारो नान्येषामिति निगदंति ॥ वस्तुतस्तु लोकेपि यथा गुणाधिकेष्वेवाधिकारः प्रचयं गमिष्यति तथैव संसारिणः पुरुषस्यापीति हृदयम् ॥ त्रैवर्णिकेष्वपि तत्तदाश्रमानुरोधेन धर्मो विहितः ॥ यथा ब्रह्मचारिधर्मो गृहस्थधर्म इत्यादिः ॥ ननु वेदाभ्यासाग्निहोत्रादीनि कर्माणि विधीयंते शास्त्रेषु न धर्माः । अतींद्रियाणां तेषां निरूपणाशक्यत्वात् इति चेत्सत्यम् ॥ अतींद्रियस्यापि कर्मजन्यापूर्वाख्यस्य धर्मस्य तद्धेतुभूतकर्मव्याख्यानादेव लक्षणप्रमाण्याद्यभिव्यक्तिर्भविष्यतीति सर्वाण्यपि कर्माण्येव निरूपितानि ॥ वर्णमधिकृत्य प्रवृत्तो वर्ण-

धर्मः उपनयनवेदाभ्यासादिः स साधारणस्त्रैवर्णिकानाम् ॥ ब्राह्मणानां तु प्रवचनप्रतिग्रहादिको विशिष्ट इति पूर्वोक्तपंचस्वपि साधारणविशिष्टाख्यौ भेदौ प्रवर्तेते ॥

वर्णाश्रमोचितानि कर्माणि यथाविधि यथाशक्ति सम्यगाचरन् संकल्पितानैहिकान् आमुष्मिकांश्च कामान् समश्नुते ॥ अहिंसादयो ये साधारणधर्मास्तान्निरूपयामः ॥ अहिंसानाम त्रिभिः करणैः प्राणिनामपीडनं यया च्छेदभेदादिनात्यर्थं व्यथंते भूतानि सा कायिकी । यया हृदि विद्ध इव संतप्यते लोकः सा वाचिकी । मानसिकी पुनरनिष्टचिंतनया समुद्भूतक्रोधावेशादिना भूतानि बाधते मलिनयति च चित्तम् ॥ मलिने चित्ते परात्मनोर्विनाशहेतवो रागद्वेषादयस्समुत्पद्यंते ॥ त एव खलु साक्षात्पुरुषार्थविरोधिनः ॥ उक्तं च भगवता (गी. अ. १९) "द्वारं नाशनमात्मन" इति ॥ मनस्तु सकृद्दृष्टश्रुतानुभूतार्थान विषयीकृत्य आहितसंस्कारवशात् कचित्कदाचित् तदेवान्वेति प्राक्संस्कारारब्धान्येव कर्माणि प्राणिनां यतो जातमात्रस्यापि शिशोरसंस्कृतमतेः स्तन्यपानादिप्रवृत्तिरपि प्राक्संस्कारारब्धैव, पुनर्जन्मबंधहेतुरपि संस्कार एव जननांतरकृतानि संस्मरति खलु मनः ॥ महाकवयोपि मनो हि जन्मांतरसंगतिज्ञमिति प्रत्यपीपदन् ॥ संस्कारः फलानुमेय इति प्रथितं च

लोके ॥ यथा मनसि पापीयान् संस्कारांकुरो नोत्पद्येत तथा प्रयतितव्यमित्यनुशासनार्थमेव ॥ सर्वश्शास्त्रीयविधिप्रतिषेधारंभः सफलो भवति ॥ कायिकेनापराधेन स्थावरत्वं वाचिकेन पाशवं मानसिकेन च अंत्यजतामुपैतीति भृगुसंहितायां (१२ अ.) मनूक्तमनूद्यते ॥ अतः पापीयान्मानसिकोपराधः । तस्मात्त्रिभिः करणैरहिंसैव परमो धर्म इति श्रुतिरनुशास्ति 'माहिंस्यात्सर्वाभूतानी' ति ॥ नचाग्निष्टोमीयपश्वालंभनस्यापि हिंसारूपत्वेन कथमहिंसा परमो धर्म इति वाच्यम् । यथा दंडपारुष्यनिर्णये राजाज्ञाविहितकशाप्रहारो न हिंसा भवति यथा अन्यत्र सा हिंसैव तथा विहितेषु न हिंसैव ॥ अहिंसया स्थैर्यं वैतृष्ण्यं मनःप्रसादमभयं चाधिगच्छति ॥ शरीराद्यस्थिरत्वविचारेण निवृत्तहिंसाकर्मणः पुरुषस्य संसर्गाद् भूतान्यपि निर्वैराणि भवंति ॥ अतः अहिंसा परमो भवेत् ॥ सत्यं नाम यथार्थभूतताभिधानम् । 'सत्यान्नास्ति परो धर्मः' 'सत्येन विधृतानि जगंति' 'सर्वाणि भूतानि सत्येन संतिष्ठंते' 'सत्ये सर्वं प्रतिष्ठित' मिति ॥ यजुरारण्यकी श्रुतिरपि 'तस्मात्सत्यं परमं वदंती' त्यभिदधाति ॥ तदेतत्सत्यं सर्वधर्मेष्वभ्यर्हितमहिंसाधृतिक्षमादिशुभगुणानां निदानं सत् पुरुषार्थसाधनाय बहूपकरोति ॥ अत्र लोकतंत्र-

निष्णाताः "सत्यं दुरूहलक्षणं न निश्चेतुं शक्यते । येन परेषामुपतापो भवति तत्सत्यमपि विफलं प्रत्यवायहेतुश्च । तस्मात्सुसूक्ष्मां कार्यगतिमभिवीक्ष्य सत्यासत्ययोः प्राबल्यदौर्बल्ये निश्चेतव्ये । कार्यगत्यनुरोधेनानृतमपि सत्यस्यैव फलमुपनयति । तदेतदनुशिष्टं पूर्वाचार्यैः 'पंचानृतान्याहुरपातकानी'ति ॥ उपन्यस्यंति 'अन्यदेव हि पांडित्यमन्यच्छास्त्रनिबंधन'मिति ॥ नात्र स्वाच्छन्द्यमवलंबितुं युज्यते ॥ क्वचित्सत्यानृतयोः फलविपर्यासः सुसूक्ष्मेण केनापि हेतुना निष्पन्नोपि न ह्यनृतं सत्यवद्भवति ॥ बलिर्दानेन संबद्ध इति न लोभस्योत्कर्षः कदापि संपद्यते ॥ यदुक्तं 'कार्यगत्यनुरोधेनानृतमपि विशिष्यत' इति । तदेतदर्थतंत्राणामतिसाहसं धर्मप्रधानाः प्रशमायना न सहंते ॥ शुभान्यशुभानि वा कर्माणि कृतानि कायेनाभ्युदितानि वाचा चिंतितानि मनसा जलतरंगसंगततैलबिंदुवद् विसृत्वराणि स्वोत्तरोत्तरविपुलकर्मजनकानि भूत्वा सर्वथैव कर्तारं भजंते ॥ अनृतं हि महत्पातकं श्रेयोविघातकं सर्वस्य ॥ ऐतरेयारण्यके 'तस्मादनृतन्न वदेदयेतत्तेनेनेति सर्वथा निंदत्यनृतम् ॥ अर्थकेवलिभिः पुनरादृियंते खल्वन्येपि धर्मविद्विष्टा औपनिषदधिकरणोक्ताः काणकुष्ठादयो योगाः । अर्थशास्त्रनिर्दिष्टाः विवाहबंधमोचना-

दयो लोकस्थितिहेतव इति तदभिप्रायेण यथार्थधर्मनिर्वाहो नैव भवेत् । तदुपेक्ष्यमेव । तस्मात्सत्यमेव परमं वदंति ॥ दमो नाम बाह्येंद्रियनिग्रहः । निगृहीते खल्विंद्रियग्रामे सर्वसंपदां भाजनं भवति पुरुषः । सर्वधर्ममूलं हि दमः । यदर्थमेव कृच्छ्रचांद्रायणादयो नियमाः प्रकृष्टाः ॥ नियमाध्ययनस्य वृद्धोपासनायाश्च दम एव फलम् । अदांतः पुरुषः सर्वक्लेशभाजनं भवति । इंद्रियाराम दांडक्यादयो विनष्टा इति प्रथितमेव । दमप्रभवा एते धृतिदाक्ष्यसाध्वार्जवमार्दवप्रियवादिताऽकार्पण्यसंतोषादयो महागुणा मंडयंति पुरुषप्रकांडम् ॥ सारस्वतप्रथमावतारभूमिर्वल्मीकजन्मा महामुनिः श्रीरामायणयुद्धकांडे प्रतिपादयति 'इंद्रियाणि पुरा जित्वा त्रैलोक्यं जितवानसी' ति ॥ अतः दम एव दोषानुषंगिणावप्यर्थकामौ धर्मानुबंधिनौ विदधाति ॥ संतोषो नाम दैवाल्लब्धेन पर्याप्तिबुद्धिः । येन केनापि संतुष्टस्य यत्सुखं तदेतदुपर्युपरि मनोरथमनुकामयमानस्य तदलाभात्क्लिश्यतः दुरापूरेण कामेन नष्टबुद्धेः पुरुषस्य कुतः स्यात् ॥ असंतोषप्रभवा इमे रागद्वेषभयक्रोधश्रमशोकमोहादयो दोषाः पुरुषस्य तेजोदाक्ष्ययशःप्रमुखान् पुरुषार्थसाधनहेतुभूतान् विनाशयंति शुभगुणान् । यथा नैराश्येन मनसः प्रशांतिर्न तथा दुराशासंपादितैरर्थैरिति मंकिरनु-

जगौ महाभारते ॥ ययातिरपि उपभोगेन कामो न शाम्यति किं तु परित्यागेनैव शाम्यतीति भागवते जगाद ॥ एवमन्ये शुकादयोप्यसंतोषं विनिंदंतो नैराश्यं परमं सुखमिति व्यवस्यंति ॥ संतोषस्य फलमद्रोहः ॥ अक्रोधो नाम सत्स्वपि क्रोधहेतुषु परेषामाक्रोशाभिघाताादिषु समुत्पतितस्य क्रोधस्य क्षमयैव निरासः । अक्रोधेनैवमैत्रीप्रमुदितादयो महात्मभिरप्यलभ्याः भूयांसो गुणाः लभ्यंते ॥ क्रोधोच्चलद्वात्रस्य भ्रुकुटीभीषणमुखस्य भूतवित्रासोः गुरुतिरस्कृतिरात्मोपघातः मद्वेषोऽवाच्यजल्पनमित्यादयः सर्वप्राणिविद्वेषहेतवो दोषास्समुद्भवंति श्रेयांसि प्रतिबध्नंति पुरुषस्य ॥ अक्रोधनः शुभलक्षणः पुमान् मंगलमायतनं लक्ष्म्याः । अतः पुरुषार्थसाधकस्य अंतरंगतमः क्रोधक्षयः ॥ शमो नाम अंतरिंद्रियनिग्रहः । येनैकेन बलवदभ्यस्तेन त्रिवर्गसिद्धिः स्वयं वृणुते पुमांसम् । यदर्थमेव मुनयो गिरिगुहाग्रावाणमधिशिश्यिरे ॥ यदर्थमेव यतंते चतुराश्रमिणोपि ॥ यदर्थनिबंधनाः निखिलाम्नायमौलिमीमांसारंभाः ॥ तादृक्शमस्य लाभ एव पुरुषार्थलाभ इति प्रभिन्नप्रस्थानानामपि विदुषामेकं मतम् । नारायणीय-याज्ञिक्युपनिषदि समाम्नायते 'शमेन शांताश्शिवमाचरंति' इति । सैषा शमप्राप्तिर्बहुसाधनापेक्षिणीति प्रवृत्ताः शास्त्र-

नियमाः कामचारकामवादकाममक्षादीन् अत्यंतं निषेधंति । दिङ्मंडलजयिनो महावीरास्तपस्विनो महर्षयः सर्वस्वदातारस्सत्पुरुषाः सदसस्पतयोपि मनीषिणः शमसंपदमनुपलभ्य विफलायासास्संवृत्ताः ॥ अत एव भगवती श्रुतिरपि 'शमो भूतानां दुराधर्षम्' इति प्रतिपादयति ॥ भगवानपि (गीता ६ अ.) 'मनो दुर्निग्रहं चल' मित्यभिधत्ते ॥ तन्निग्रहोपायाश्च अभ्यासवैराग्यादयस्तत्रैव प्रतिपादिताः ॥ किं बहुना तेनैकेन शमाभिधेन सर्वधर्महेतुना भुवनभूषणा भवंति महापुरुषाः ॥ स एव सकलपुरुषार्थहेतुः ॥ अप्रदत्तानुपादानम् अस्तेयम् । बहिरंतःशुद्धिः शौचम् । आपन्नार्तिपरिहारो दया । पात्रेभ्यः प्रतिपादनं दानम् । चित्तस्य निर्विकारः क्षमा । एत एव धर्माः सर्वमानुषसाधारणाः । यैरेतैर्विदुरादयः शूद्राः पापयोनयो धर्मव्याधादयश्च पूतात्मानो महापुरुषतां प्राप्ताः ॥ एतैर्धर्मैर्विरहितानां त्रैवर्णिकानामपि वर्णाश्रमविहितधर्मो न गुणाय कल्पते ॥ यागः अध्ययनं दानं तपः इत्येते चत्वारो धर्ममार्गाः कैश्चिदंभार्थमपि सेव्यंते ॥ सत्यं दया क्षमा अलोभ इति चत्वारो महापौरुषिका एव धर्माः ॥ महाभारते आरण्यपर्वणि युधिष्ठिराजगरसंवादे अयमेवार्थः सम्यक्प्रपंचितः । तस्मादेते सार्वजनिका धर्मा निखिलश्रेयोभ्युदयहेतवो महापुरुषैरम-

मत्तैस्संसेविताः पुरुषार्थफलं साक्षात्परंपरया वा समुपनयंति ॥ यथा त्रैवर्णिकविषयाः विशिष्टधर्मास्साक्षान्निश्रेयसकरास्तथा तान्व्याख्यास्यामः ॥ ब्राह्मणस्याध्ययनयजनदानानि साधारणो धर्मः । अध्यापनयाजनप्रतिग्रहाः विशिष्टो धर्मः । क्षत्रियस्य युद्धाभिनिवेशः प्रजापालनं विशिष्टः । वैश्यस्य वार्ताश्रयणं विशिष्टः । अध्ययनयजनदानानि सर्वेषां साधारणः । शूद्रस्य सेवैकैव । त्रैवर्णिकाः स्वस्वविहितेन धर्मेणैव पूतात्मानः परां सिद्धिमभियांति ॥ प्रतिजानाति भगवान् यदुनंदनो गीतायां (१८ अ.) 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव' इति ॥ त्रैवर्णिकानां ये ये धर्मा विहितास्तेपि देशधर्मजातिधर्मकुलधर्मादिभेदेन बहुधा विभिन्ना महाजनैरनुमताश्च ॥ शिष्टाचारप्राप्तस्याप्युपादेयतामंगीकृत्य लोकविद्विष्टं धर्म्यमपि नाचरेदिति मन्वादयो न्यरूपयन् ॥ शिष्टसांप्रदायिका अपि देशकालानुकूलाः वृत्तिलोपभिया प्रवृत्ताः पुरुषार्थाविरोधिनः जनोपकारका भवंति ॥ यथौत्तरीयाणां समुद्रसंयानं ब्राह्मणानामायुधग्रहणादिकम् ॥ दाक्षिणात्यानां मातुलकन्यापरिणयो यातयामान्नभोजनादिकं च देशाचारात्प्रवृत्तम् ॥ तत्र देशाचार एव प्रमाणम् ॥ धर्मशास्त्रेषु तेषां पातकेषु परिगणनात् ॥ एवं स्थितेपि अविगीतशिष्टाचारम-

वृत्ताः श्रुतिस्मृत्यनुज्ञाता एव धर्माः श्रेयसे कल्पंते नेतरे । उक्तं च मनुना (१ अ.) 'आचारः प्रथमो धर्मः श्रुत्युक्तः स्मार्त एव चे' ति ॥ ब्राह्मणानां विहितेषु कर्मसु यजनाध्यापनदानानि निष्कामकृतानि मोक्षसाधनानि ॥ सकामानि प्रवृत्तिलक्षणानि ॥ अध्यापनादीनि वृत्त्यर्थकानि ॥ आपदि वृत्तिकार्शितस्य ब्राह्मणस्य प्रत्यनंतरवृत्तिग्रहणमप्यनुज्ञातं शास्त्रवचनैः । प्रत्यनंतरवृत्त्याश्रयिणो ब्राह्मणा भोगलोलुपा अर्थकवलिनः कामात्मानो ब्राह्मण्यलक्षणाच्च्यवंते च्युतानां पुनर्वर्णसांकर्येण वर्णाभिव्यंजकलक्षणमपि संकीर्णप्रायं दृसति ॥ एवं क्षत्रियादीनामपि ॥ एवं संकीर्णवृत्तिभिरर्थकामपरैर्वैदिको धर्मस्तत्र यथान्यथायुक्तिबलादुन्नीतः स्वरूपहानिमापद्य पुरुषार्थसाधनाय दुर्बलः संवृत्तः ॥ शास्त्रनिर्दिष्टवर्त्मना स्ववर्णाश्रमधर्मा अनुष्ठेयाः ॥ आश्रमाश्चत्वारः । तेष्वाद्यं ब्रह्मचर्यमेव । आश्रमांतराणां तन्मूलानां पुरुषार्थानां च निदानं वेदग्रहणव्रताचरणं ब्रह्मचर्यम् । तच्च गर्भाधानादिभिर्वैदिकैस्संस्कारैस्संस्कृतस्य यथाकालं विहितोपनयनस्य द्विजन्मनो विहितम् । उपनयनं नाम विद्यार्थस्य श्रुतितस्संस्कारः । उपनीतो ब्रह्मचारी गुरुकुलमधिष्ठाय वेदग्रहणांतं यथोक्तनियमेन वर्तमानो द्वितीयाद्याश्रमयोग्यो भवति । त्रिवर्गसाधनाय ये ये गुणा-

स्समपेक्षितास्ते सर्वेपि ब्रह्मचर्यं यथोक्तनियमवता पुरुषेण लभ्यंते । नवे वयस्याहितस्संस्कारो गुणोपचयाय संपद्यते । रागादिभिरमलिनायां चित्तवृत्तौ सदुपदेशाः प्रतिफलंति । यथोक्तनियमविधुरः फले दुर्विधो भवति । यावज्जीवमनुभूयमानत्रिवर्गस्य मूलं ब्रह्मचर्यम् । अनेनोपचितदृढशरीरस्यालंकर्मीणस्य प्रसन्ने चेतासि प्रज्ञाप्रतिभादयः स्वयमुत्पद्यंते ॥ नियमानभ्यस्यतः क्लेशसहिष्णुता सुखदुःखसंवेदनं भूतमैत्री प्रमुदिता इंद्रियजयः संतोषः परोपकृतिरुपशांतिरकार्यान्निवृत्तिरनालस्यं सन्नतिरिति सर्वार्थहेतवो गुणास्संभवति । यः पुमानायुषि यं यं कामं कामयेत तमैहिकामुष्मिकं वा समधिगंतुं शास्त्रोक्तनियमचारी ब्रह्मचारी शक्नुयात् ॥ यद्यपि प्राचामिव यथोक्तनियमानुष्ठानं कालदेशविपर्यासेनाधुनातनानां दुष्करं तथापि 'यावच्छक्यं तदाचरे' दित्येवं महर्षयो विहितं षट्त्रिंशदाब्दिकं ब्रह्मचर्यं वेदग्रहणांतं वेति संकुच्य निरूपयामासुः ॥ नियमवान् ब्रह्मचारी सर्वदा गुरुशुश्रूषया प्रतिषिद्धपरित्यागेन यथाकालमबोधेन अखंडितब्रह्मचर्येण च समिध्यमानब्रह्मतेजसा ज्वलन् श्रेयोविघातकान् प्रमादालस्यजाड्यादीन् विजेतुं सांयुगीनो भवति ॥ अग्नींधनभैक्ष्यचर्यादयो ब्रह्मचारिनियमास्तेजोयशःप्रज्ञामेधायुष्यादिकं वर्ध-

यंति ॥ अतस्समाचरितब्रह्मचर्यो भवति त्रिवर्गभाजनम् ॥ एवं ब्रह्मचारी वेदशास्त्राभ्यासादिना विज्ञातोभयलोकतंत्रः गार्हस्थ्यमाश्रित्य श्रुतिसमुदितमैहिकं पारलौकिकं च धर्ममाचरेत् ॥ गार्हस्थ्यं नाम श्रुत्युदिताधानादिकर्मनिर्वहणयोग्यतासंपादकम् । संतत्या पितृऋणापाकरणं प्रधानं फलं गार्हस्थ्यस्य । तथाच याज्ञिक्युपनिषदि श्रूयते 'प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तंतुं तन्वानः पितृणामनृणो भवति' इति ॥ स एष गृहस्थाश्रमस्त्रिवर्गापक्षेत्रं यस्मिन्नुप्तानि त्रिवर्गबीजानि फलंति ॥ धर्माविरुद्धयोरर्थकामयोर्गार्हस्थ्यमेव जन्मभूमिः ॥ तदिदं सर्वेषां प्राणिनामुपजीवनम् । अत एव मन्वादिभिरस्यैवोत्कर्षः प्रतिपादितः । महाभारते शांतिपर्वणि मुनिशकुनिसंवादरूपाख्यायिकामुखेनास्यैव प्रशंसाभिधीयते ॥ ब्रह्मचर्यादेव प्रव्रजतः कुमारानुद्दीक्ष्य शक्रः शकुनिरूपस्तान्निवर्तयितुकामः प्रावोचत् 'अये कुमाराः विघसामृताशने परित्यज्य प्रव्रजतां भवतां कुतश्चित्तशुद्धिः । ऋणान्यनपाकृत्य कथं मुमुक्षवो भवथेति ॥ कृतदारसंग्रहस्य स्वेषां परेषां वा योगक्षेमनिर्वहणाय अप्रतिषिद्धावर्थकामौ यावदर्थं जुषमाणस्य साधीयान्पुरुषार्थलाभः स्यात् । 'जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते' इति श्रुत्या देवर्षिपितृणापाकरणयावश्यकं म-

वति ॥ ऋणं नाम मद्वंश्यास्सर्वे वेदाभ्यासादिकं नोल्लंघयेयुरिति बलवदनुशासनम् ॥ अधीतवेदः ऋषीन् आहिताग्निर्देवान् कुलतंतुना पितॄंश्च प्रीणयन् कृतकृत्यो भवति । देवर्षिपितृभूतानि नित्यमन्नादिसंविभागेनाराधितानि श्रेयांस्याशासते गृहस्थस्य । गीतासु 'एतेन प्रसविष्यध्वमेष वोस्त्विष्टकामधुक्' इति(३अ.) भगवान् निरूपयामास । यज्ञस्य स्वार्थपरित्यागपूर्वकपरोपकृतिः फलम् । ते च ब्रह्मयज्ञदेवयज्ञपितृयज्ञमनुष्ययज्ञभूतयज्ञसंज्ञकाः पंच ॥ शतपथब्राह्मणे 'पंच वा एते महायज्ञाः सतति प्रतायंते सतति संतिष्ठंत' इति आम्नातम् । सर्वेषामपि यज्ञविधीनां तत्तत्कर्मोचितानेकावांतरक्रियाकलापरूपाणामपि पुरुषार्थसाधनोपयोगी कश्चित्परमार्थो निगूढो विज्ञायते । यजेर्देवपूजादानाद्यर्थकत्वेन यज्ञशब्दस्यापि यथासंभवं दानादिकमर्थः । ब्रह्मयज्ञो नाम अध्ययनमध्यापनं च । अनुष्ठीयमाने कर्मणि विधिप्रतिषेधज्ञानमावश्यकम् । तदर्थमध्ययनं च । अनधीतवेदः प्रमाद्यति स्वकर्तव्यतायाम् । अध्यापनस्य च अनभिज्ञानां कर्तव्यतोपदेशः फलम् । अतो नित्यानुष्ठेयो ब्रह्मयज्ञः स्वस्य च परेषां चोपकुरुते नित्यहोमेन तर्पणेन च समाराधितैर्देवैः पितृभिश्च परमनुगृहीतः संवर्धते । देवाः पितरश्च भौमेन पथा निगूढं संचरमाणाः क्रियावतः

पुरुषस्य कामानापूरयंति । तैर्दत्तैरर्थैस्तानेवाराध्य श्रेयो विंदते विघसामृताशी सर्वकिल्बिषात्प्रतिमुच्यते । देवयानेन पितृयाणेन वा स्वकर्मवशात्संचरमाणस्य तदनुग्रहेण त्रैलोक्येपि सुखलाभः स्यात् । यस्तु स्वोदरपूरणायैव पचति नार्थिभ्यस्संविभजते स पापीयान् भवति श्रेयसा च वियुज्यते ॥ भगवता संदर्शितोयमर्थो गीतायां 'भुंजते तेत्वघं पापा' इति । अतो दैवाल्लब्धेन देवपितृयज्ञावनुष्ठेयौ । अतिथिसत्कारो मनुष्ययज्ञः । सुविदितमेतत्सर्वेषां गृहागतानां महीयसां सत्कारैर्दुर्लभस्याप्यर्थस्य लाभः स्यादिति । रंतिदेवालर्कशिबिप्रमुखैः परमादरेण प्रदर्शितोयं पंथाः कस्य वा धर्मिष्ठस्य नाभिमतः स्यात् । अनेन महायज्ञेन अहरहराचरितेन सर्वेषां दयनीयः कौटुंबिकः सर्वक्लेशानुत्तरति ॥ स एष महायज्ञः स्वल्पेनापि तृणजलसूनृतादिना निष्पाद्यते । गार्हस्थ्यमाश्रितेन सर्वभूतदयालुना भाव्यम् । यथाशक्ति प्राणिनामुपकुर्वाणः आर्तानामार्तिहरः सर्वभूतांतरस्थमात्मानं समाराध्य स्वात्मोद्धाराय प्रभवति । कविरभिधत्ते 'सदुपकारफलां श्रियमर्थिन' इति । स एष सर्वार्थसाधको मनुष्ययज्ञः । भूतयज्ञो नाम आश्वपचमा च कीटपतंगेभ्यो भूतेभ्योऽन्नादिसंविभागः । स्वाश्रितभरणं हि साधीयान्धर्मपथः । अनभ्यवहारदूनेषु स्वाश्रितेषु कस्य वा सचेतन-

स्यात्मा परितुष्यति । तिरश्चामपि भूताराधनप्रवृत्तिर्दृश्यते कपोतलुब्धकोपाख्यानेन महाभारते । कश्चित् कपोतो गृहागतं लुब्धकमपि स्वैर्मासैर्न्यमंत्रयदिति । प्राणिनां क्षुत्पिपासादिजनितदुःखं स्वानुभवेन विजानन् रंतिदेवः कतिचिदिनान्युपवसन्नपि दैवालुब्धं जलमन्नं चार्थिभ्यः प्रायच्छदिति च । त एते सर्वेपि महायज्ञा अर्थमूलाः ॥ अर्थो नाम व्यवहारोपयोगी चराचरात्मको वस्तुविशेषः । अर्थेन विहीनस्य सर्वाः क्रिया लुप्यंते । अनधिगतार्थः पुमानणुमात्रमपि दातुं भोक्तुं च न पारयति । इष्टापूर्तानि कर्माणि बहुद्रव्यसाध्यानीति बहुधा प्रपंचितं शास्त्रेषु । तत्र सप्तविधा अर्थागमास्त्रैवर्णिकानां यथायोगं विहिताः । अदृष्टः प्रतिग्रहः । कुलानुगतं धनम् । निध्यादीनां लाभः । क्रयविक्रयोपार्जितः । विजयलब्धः । कुसीदलब्धः । कृषिवर्धितश्चेति ॥ अत्र त्रैवर्णिकानां वृत्तिधर्मतया यो विहितोर्थाधिगमः स श्रेयान् । वृत्तिकर्शितस्य सीदत्कुटुंबस्य धर्मादनपेतः प्रत्यनंतरवृत्तिलब्धोपि विहितः । संपन्नः पुनर्वैश्यंतराश्रयणेन दूषितो भवति । आपदि "विद्या शिल्पं भृतिः सेवा गोरक्ष्यं विपणिः कृषिः । धृतिर्भैक्ष्यं कुसीदं च दश जीवनहेतव" इति मनुरब्रवीत् ॥ एतेपि मनुष्याणामत्यंतापदि धर्म्याः । एतेषु यथायोग्यं वर्तमानस्त्रैवर्णिकाः स्व-

धर्मान् आतिष्ठेयुः । आपदनापद्विषयौ देशकालानुगुण्येन व्यवस्थितौ । तत्रापि तारतम्येन कांचन पौरुषेयीं व्यवस्थामवलंब्य धर्मे प्रयतेरन् । यद्यंतरा कामलोभादयो नापतेयुः तदा शास्त्रोक्ता विधयोपि सफला भवेयुः । इदानीं तादृशानां विधीनामात्यंतिको विलोप एव क्वचित्कचिद्दृश्यते । तादृशलोपस्य केवलकामलोभादय एव हेतवः ॥ त एते श्रेयःपरिपंथिनो विद्वांसमपि धीरमपि सचेतनमपि बलादाक्रम्य खलीकुर्वते ॥ एतैराक्रांतचेतसां सर्वा अपि विधिचोदिताः क्रियाः कृता अपि निष्फला भवंति ॥ तस्माद्यथा नावस्कंदेयुरिमे लोभादयो नाभिभवेयुर्दोषा रजस्तमःप्रभवा नाक्रामेयुरपयशांसि पुरुषं तथा विधिप्रतिषेधौ निदर्शयंति शास्त्राणि ॥ शास्त्रविध्युल्लंघने दोषमपि भगवान् (गीता १९अ.) न्यरूपयत् 'यः शास्त्रविधिमुत्सृज्य' इत्यादि । श्रद्धा वित्तं विधिरिति श्रेयोभ्युदयहेतवः शास्त्रनिर्दिष्टा नोल्लंघनीया लेखामात्रमपि । अतो वृत्तिकर्शिता द्विजातयो मनूक्तेषु दशविधजीवनहेतुष्वपि येनात्मापकर्षो न भवेद्यदालंबनेन कुलधर्मा न विपद्येरन् येनांतरात्मापि प्रमोदेत तमेव जीवनहेतुमाश्रित्य यावदर्थपरिग्रहाः स्वधर्मानातिष्ठेयुः । अन्यथा विद्येति मद्यसंधानावरोहणं लाभ इति न्यासहरणं शिल्पमिति कृत्तिसीवनं कुसीदमिति चक्रवृद्धिग्रहणं सेवेति

नीचोपसर्पणं विपणिरिति विगीतवस्तुविक्रयो वृत्तिरित्युच्चावचकर्मारंभश्चैते पुनर्द्विजन्मनां नाशहेतवः ॥ विगीतवृत्त्या वृत्तिसांकर्यं तेन वर्णसांकर्यं ताभ्यामात्मापकर्षस्तैरधोधःपात इत्यनर्थपरंपरा प्रसज्येत ॥ तस्मादभिजातः पुमानात्मोद्धारायैव प्रयतेत नैवात्मनिपाताय । अनुशास्ति यदुनंदनो गीताशास्त्रे 'उद्धरेदात्मनात्मानं नात्मानमवसादये' दिति ॥ तस्माद्विहितैर्वृत्तिधर्मैरास्थितलोकयात्रः सुखमेधते । उक्तैर्दशविधजीवनहेतुभिः सप्तधनागमैश्च समुपार्जितेन वित्तेन नित्यनैमित्तिकानि निर्वर्तयन् पंचमहायज्ञान् यथाशक्ति समाचरेदन्यथा समधिकार्थलोभेन पापीयान् भवति । इतिधर्मरहस्यम् ॥

अर्थतंत्राः पुनरेतन्न क्षमंते ॥ यथाकथंचिदर्थलाभ एव पुरुषार्थः । धर्मकामावपि तदधीनौ । तद्विहीनस्य तेजो धृतिर्दाक्ष्यं महापौरुषिकत्वमित्यादयः सर्वजनाभिनंदनीया गुणा विलीयंते । व्यर्थः कुटुंबभरणाकल्पः सर्वैः परिभूयमानो न शर्म लभते । नास्त्यर्थवतामसाध्यं नाम । अतः कौटिल्यकामंदकादिभिरुपदिष्टमर्थशास्त्रमर्थागमनिदानमिति मन्वानाः अर्थोपार्जनाय प्रवृत्ता अर्थार्जनरक्षणवर्धनादिष्वेवाप्रमत्ता दिवानिशं प्रयतंते । काणवराटिकाव्ययमप्यसहमानानां येषामभीक्ष्णधनागमचिंताशबलितधियां वितस्तिमात्रोदरपूरणाय व्ययितम-

स्तिपरिमिततंडुलं तत्पाकव्ययितेंधनसंचयं च विलिख्य विलिख्य भृशं निःश्वसतां न धर्मो नापि वा भोगः संपद्यते वृथासंचितेनेति केचन तदसत्। अर्थपूर्वास्सर्वे समारंभाः।तस्मादर्थवृद्ध्यै क्षयव्ययपरिवर्तनप्रतिबंधापहारोपभोगादीनर्थोपचयहेतूनपास्य कृषिपाशुपाल्यशिल्पविद्याप्रमुखान्यर्थोपचयसाधकानि संवर्धयेत् । यद्यत्र सामयिकाचारधर्मशास्त्रादिनियमभंगःस्यात् तदा तत्संकोचेनैव व्यवहरेत् । देशकालानुरोधेन धर्मशास्त्रार्थशास्त्रयोः संकोचविकासौ संभवतः । येन केन वा निमित्तेन स्वार्थोद्धारः प्राज्ञलक्षणं तद्भ्रंशो हि मौर्ख्यम् । नित्यमुत्थानवतार्थाधिगमायैव प्रयतितव्यम् । प्रचुरधनवतामेव यज्ञदानादयः कामोपभोगादयश्च सेत्स्यंते । धनविहीनानामग्निहोत्रादिकमपि निंदति श्रुतिः । संचितधनानामेव सोमपानार्हतां मनुरनुजानीते ॥ यदि कुटुंबिनां यावत्कुटुंबभरणपर्याप्त्यधिकं धनं विद्यते तदा दानादिषु प्रवृत्तिर्भवति । यानासनशयनोल्लोचभवनादिकामोपसाधनान्यर्थमूलानि पुरुषमनुरंजयंति । धर्माय यशसेर्थाय कामाय स्वजनाय च पंचधा संविभज्य यथायोग्यमर्थमुपजुषाणः पुरुषार्थमुपचिनोति । अर्थाधिगमाय प्रयतमानानां कथंचिद्धर्मलोपसंभवेपि प्रचुरधनसाध्यैः प्रायश्चित्तैः स दोषः शाम्यति । निंदंति च स्वानर्थकारणं धर्ममपि-

वह्वृचाः ॥ पराग्वा एतद्रिक्तमक्षरं यदेतदोमिति । धनाद्धर्मस्तत्सुखमित्यभियुक्तोक्तया च धनं धर्ममूलम् ॥ तस्माद्धर्मकामयोरर्थानुबंधिनोः पुरुषार्थत्वमर्थादेवेति तमेव प्रधानं मन्यंते पुरुषार्थम् ॥ केमे धनलाभमोहाभ्यां संतापितहृदयाः काणवरीटकाकिराटाः क्व ते सुकृतिनस्सर्वस्वदक्षिणादातारो महाधीरा धर्मगोप्तारः । न संभावितमेव धर्मविधुरयोरर्थकामयोः पृथक्पुरुषार्थत्वम् । सर्वलोकनिंद्यास्ते अर्थकामपरमा लुब्धाः कामिनश्च । अर्थतंत्राः केचन न विजानंति तमेतं परमार्थम् । यदिह लोके स्यंदनप्रवेक्षकैरश्वरत्नैर्मदालसमदावलैर्विहारवीथीषु विचरंति श्रीमंतस्सुकृतिनस्तदेतद्दानविलसितमिति ॥ यदिह सुखिनोऽस्पृष्टक्लेशलेशाः संपन्नसर्वमनोरथा विराजंते तदेतद्धर्मवैभवमिति । यदिह वसुंधरायां यशस्विनो दयालवः सर्वजनश्लाघ्यमानदिव्यमहिमानः सुकृतभागिनः सर्वभूतान्यावर्जयंति तदेतत्पूर्वकृतपरोपकारफलमिति च । किंबहुना ? तुल्यश्रुतधरास्तुल्योद्योगिनोप्यपुण्यभाजो न लभंते काकिणीमपि ये पुनस्सुकृतिनः संचिन्वते सर्वमप्यभीप्सितमर्थमनायासेन ॥ एवं दृष्टश्रुतानुभूतैर्लिङ्गैर्धर्म एवानुमीयते ॥ श्रुतिरपि 'धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पंती' ति धर्मधर्मवतोः प्रशंसामभिधत्ते ॥

तदनुगामिनोरर्थकामयोर्यावदर्थोपादेयतामनुजानाति । एतदर्थानुबंधीन्येव सर्वाणि धर्मशास्त्राण्यपि ॥ आन्वीक्षिकी त्रयी वार्ता दंडनीतिश्चेति चतस्रो विद्या ऐहिकामुष्मिकफलहेतव इति प्रतिपादयितुं प्रवृत्तान्यप्यर्थशास्त्राणि पूर्वपूर्वाविरोधेनोपादेयतामनंतरोक्तानां निर्दिशंति । अन्यथा स्वोक्तिव्याघातदोषस्य स्वहस्तो दत्तः स्यात् । अतो धर्माविरोधेनोपार्जितस्यार्थस्यैव पुरुषार्थोपयोगितयास्य द्वितीयतया निर्देशस्साधीयान् । एवं धर्मार्थावविरोधेन साधयतस्तृतीयोपि कामाख्यः पुरुषार्थः ॥ कृतिसाध्येष्टसाधनताबुद्धिः संकल्पः । तन्मूलकेच्छा कामः । काममयोयं पुरुषो नित्यमात्मनः कामानाशीर्भिराशास्ते । आयुः प्राणं मे धुक्ष्व पशूविशं मे धुक्ष्व श्रियं यशो मे धुक्ष्व लोकं ब्रह्मवर्चसमभयं यज्ञसमृद्धिं मे धुक्ष्व इति यद्यप्ययमवरोपि पुरुषार्थेषु सर्वारंभेष्वप्यनुवृत्ततयास्य पुरुषार्थत्वम् । न ह्यकामस्य कचिदपि प्रवृत्तिर्दृश्यते । सर्वमपि लौकिकमलौकिकं वा कर्म न काममंतरेणोपपद्यते ॥ धर्मार्थमोक्षादिपुरुषार्थेष्वपि प्रवर्तकः काम एव । यद्यदनुतिष्ठति पुमान् तत्सर्वमपि काममूलम् । तस्मात्पुरुषार्थेषु कामस्यैवमाधान्यमिति चेत् । बाढम् । किमत्र काममात्रस्य पुरुषार्थत्वमथवा विध्यनुगृहीतस्य । न प्रथमः । बंधहेतुत्वात्

विद्विष्टत्वाच्च साधुभिर्निंदितत्वाच्च धर्मप्रभावचनैः । यो हि केवलेच्छासमारब्धे वस्तुनि विगीते प्रवर्तते तस्येंद्रियचपलस्य नायं लोकोस्ति ॥ बहुप्रकाराः कामशाखाः पुरुषमदांतं बलान्निपातयंति । नाहि कामादन्यत्रैवंविधो निपातहेतुरुपलभ्यते । बहवो विशिष्टमतयः खलीकृताः खल्वनेन । विनाश एवास्य फलम् । भगवता गीतायामुपदर्शितं (२ अ०) ये ये दोषाः पुरुषार्थविरोधिनस्ते सर्वेपि कामप्रभवाः । सौभरिप्रमुखा मुक्तसंगा अपि केनापि हेतुना संभूतेनानेन स्वसिद्धिं परित्याजिताः । सैषा कथा विष्णुपुराणे संदर्शिता । सौभरिर्मुनिः संगभीतो जलांतर्निमग्नस्तपश्चरन् कस्यचन मीनस्य कौटुंबिकव्यापारेण विकृतचेताः पंचाशन्मांधातृदुहितॄरुद्वहन् चिराय विषयसुखांतरितविवेक आसीदिति । आस्वादितविषयरुचिरिंद्रियगणो नोपारमति विषयेभ्यः ॥ न द्वितीयः । बंधहेतुतया दूषितत्वादाचार्यैः ॥ जन्ममरणलक्षणस्य संसारस्य वासनारूपेणावस्थितः काम एव निदानम् । तस्मान्न पुरुषार्थः काम इति ॥ आस्तामयं विवादशीलानां विवादः । सुप्रयुक्तः कामः पुरुषार्थ एव । 'कामात्मता न प्रशस्ते' त्यादिना मनुर्विगीतं कामं निषेधति नतु शास्त्रविहितं कामम् । तेषु 'सम्यग्वर्तमान' इत्या-

दिना विहितं कामं प्रशंसत्येव ॥ कामोहि द्विविधः । प्रवृत्ति-
जनको निवृत्तिजनकश्चेति । स्वर्गादिफलाभिलाषेणानुष्ठितानि
कर्माणि पुनर्जननहेतुतया बंधकारणानि भवंति । यानि
नित्यनैमित्तिकानि कर्माणि सत्त्वसंशुद्धिकामैरनुष्ठीयंते स काम
आत्मज्ञानसहकारितया मोक्षाय कल्पते प्रशस्ततरश्च भवति ॥
पूर्वोक्तं द्वैविध्यमप्यधिकारिभेदाद्भिद्यते । अधिकारिणः पुन-
र्विभिन्नेच्छानियंत्रिताः कर्मवासनया स्वस्वाभिमतेषु प्रवर्तंते ।
नचैकस्मिन् विषये समानधर्माणः पुरुषाः ॥ तमेतमर्थं
छंदोगा अनुश्रावयंति 'स यदा पितृलोककामो भवति
संकल्पादेवास्य पितरस्समुत्तिष्ठंती' त्यादिभिः । एतदविरोधी
धर्ममूलः विधिविहितश्चेंद्रियप्रीतिहेतुः स्रक्चंदनवनितालिं-
गनादिरूपश्च क्वचिदभ्यनुज्ञायते मुनिभिः ॥ उत्सिक्तानां-
मिंद्रियाणां विषयरसास्वादवैरस्यप्रदर्शनद्वारा निग्रह एवात्र
विविक्षितः । नतु तदेकांतिकत्वम् । इंद्रियाणि विषयाणामसेवया
नियंतुमशक्यानि भवंति ॥ अनुभूतास्वादानि न जहत्येव
विषयरसम् । सर्वथा दुश्शकमेवात्र तदभ्यनुज्ञामात्रमपि । चप-
लानींद्रियाणि यदि विषयप्रवणानि तदा प्राज्ञस्यापि प्रज्ञा
परिभूयते । प्रज्ञाविधुरो न शक्नोति युक्तायुक्तचिंतायामपि
मनस्समाधातुम् । अविवेकिनः कायवाङ्मानसैरपराधैरधः-

पातो भवति। अतः कामः किंरूपः किंलक्षणकः कानि वास्य स्थानानि किमधिष्ठानमिति दुरूहतरत्वमानसैरद्यापि विमृश्यते मनीषिभिः। नाद्यावधि कैश्चिदपि निर्णयो दत्तः। सर्वः कामपरतंत्रो लोक उच्चावचेषु कर्मसु प्रवर्तते स एव परमार्थ इति मन्यते च॥ किंबहुना। नैतादृशं संवननं प्राणिनां त्रिषु लोकेष्वप्यन्यदस्ति॥ अतो गुरूपदेशशास्त्रावगाहन-न्यायनिष्णातमतिभिरस्य स्वरूपं सम्यगालोच्य यथानुषंगं धर्माविरोधेन प्रयतितव्यम्। विधिविहितः सतां संमतिपन्नः कामः पुरुषार्थ इति संपिंडितोर्थः॥ अन्योन्याबाधितत्रिवर्ग-मुपजुषाणो गृहस्थाश्रमे परमार्थमोक्षहेतुभूतपरिव्राजकधर्म-साधनाय वैखानसाश्रममवलंब्य तत्तन्नियमाननुष्ठाय मनो मोक्षे निवेशयेत्॥ गृहस्थाश्रमनिर्वर्त्यानि कर्माणि यथाविधि समाप्य कुटुंबभरनिर्वहणधुरीणेषु पुत्रादिष्वाहितभरो जरा-जीर्णमात्मानं तपसि नियोजयेत्। चिरानुभूतविषयरसम-लिनं हि मनो नाल्पायसा कारणेन विरज्यते। यमैर्नियमैः सात्विकैराहारैः पराकचांद्रायणादिभिर्विषयवैराग्याभ्यासैर-न्यैश्च देहवाङ्मनोदंडैः सर्वतः प्रतिरुद्धप्रसरं शनैर्निर्वि-षयकं भवति मनः। कामाशयं हि चित्तं चिराहितदृढतरवि-षयवासनया कलुषितं पुनःपुनरुच्चावचजन्मकारणं भवति॥

मानुष्यं हि स्वर्गापवर्गयोर्द्वारम् । सुकृतविशेषलब्धे तस्मिन्नात्मनो बंधमोक्षायैव प्रयतितव्यम् ॥ प्रशांतचेतसः कामसंकल्पशून्यस्यात्मानमनुसंदधानस्य संसरणनिवृत्तिः कदापि भूयादिति सर्वे वैखानसानियमाः प्रकल्पिता मुनिभिः । यथा युगांतरेषु सर्वे वर्णाश्रमधर्मा नियता आसन् न तथेदानींतनानां नियंतुं शक्यंते । युगभेदाद्धर्माधर्मयोर्वृद्धिह्रासौ स्वयमेव संभवतः । देशकालवयोद्रव्यादिभेदेन विभिन्ना पौरुषेयी व्यवस्थापि । शक्याशक्यविचाराधीनं हि करणीयम् । यावच्छक्यमात्मश्रेयसि प्रयतितव्यम् ॥ कुटुंबभरणलालनवर्धनादिचिंतया वा लोकानुसरणजीविकासंपादनव्यग्रतया वा केवलमायुषो व्ययेन न कश्चिदात्मोद्धारप्रयोजको लाभः संजायते । स्वार्थावबोधक्रियाऽकल्पेष्विंद्रियेषु कार्याक्षमेष्ववयवेषु चिंतासंतानसंदानितस्य तृष्णायष्टिमवलंब्य संचरतो यदि कदाचिदपिनोत्पद्यते विवेकस्तदा सुतरामेव न किंचिदपि प्रयोजनं स्यात् । अतः स्वहितमिच्छता पुरुषेण विवेकिना भाव्यम् । स च विवेको नित्यानित्यवस्तुविचार एव ॥ यत्रेदं सचराचरं त्रिगुणात्मकं जगदविद्यया भासते तन्नित्यं तदन्यत् सर्वमपि स्वाविद्याविजृंभितमनित्यमिति परीक्ष्य निर्वेदाद् गुरुमभिगच्छेदेव । तदनुग्रहेणासादितब्रह्मविद्यो ध्यानधारणादिभिर्योगैर्यावदात्मसाक्षात्कारस्तावन्न विरमेत् ॥ निष्पन्ने पुनरात्मदर्शने कृतकृत्यो भवति ॥ एतदर्थमेव

सर्वेऽपि विधिप्रतिषेधादयो धर्मशास्त्रेषु निरूपिताः ॥ सर्वेषामपि धर्मनियमानां योगांतरायहेतुभूतषड्वर्गसंयमः फलम् । अन्यथा केवलं श्रमावहा एव ॥ देहाद्यभिमानो हि बंधहेतुः । सर्वोऽपि आढ्योहमभिजातः कोन्योस्ति मत्सम इत्यभिमन्यते स्वात्मानम् । अनेनैवाभिमानेन कामक्रोधलोभमोहदंभमदमात्सर्यादयः श्रेयोविरोधिनस्संभवंति । तन्निग्रहार्थममत्तः प्रयतेत । असंकल्पात्कामं कामनिग्रहात्क्रोधमर्थेष्वनर्थबुध्या लोभमात्मविद्यया मोहं साधुसेवया दंभं तत्त्वावमर्शेन मदं भूतसाम्येन मात्सर्यं च समूलघातं निहत्य शास्त्राचार्योपदेशकुशलमतिर्धीरः श्रेयो विंदते । तत्त्वपरामर्शात् केवलसत्त्वयोगात् कर्मबीजपरिक्षयात् सतां सन्निकर्षाच्च योगः प्रवर्तते । ईश्वरप्रणिधानेन नानाविधजन्ममरणक्लेशप्रहाणकारणेन विगलितान्यसंवेदनः स्वसंवेद्यमानंदं समश्नुते ॥ यद्यपि वर्णाश्रमधर्माः साकल्येन सर्वैरनुष्ठातुं न शक्यंते तथापि शास्त्रनिर्दिष्टवर्त्मना यत्रकुत्राप्याश्रमे वसन् सत्यास्तेयेंद्रियनिग्रहदयाभूतसाम्यादिभिः कल्याणगुणैः परां सिद्धिमधिगच्छति ॥ तदेतत्परमकारुणिकेन योगेश्वरेण याज्ञवल्क्येन सम्यग्व्यवसितम् । यथा "न्यायागतधनस्तत्त्वज्ञानानिष्ठोऽतिथिप्रियः ॥ श्राद्धकृत्सत्यवादी च गृहस्थोपि हि मुच्यत" इति । तदिदं धर्मसर्वस्वं मुंडकोपनिषदि प्रतिपाद्यते "परीक्ष्य कर्मचितान् लोकान् ब्राह्मणो निर्वेदमायादि"ति । "यदहरेव विरजेत् तदहरेव प्रव्रजेत्" इति

च । " तमेतं ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसाऽनाशकेन" इत्याद्यन्यत्रापि । तदेतत्सर्वमनुशासनं स्वकर्मवशादेवातिर्यङ्नरादिषु परिभ्रमतो जीवराशेरात्यंतिकसंसारोच्छेद एव परमः पुरुषार्थ इति निरूपणायैव प्रवृत्तम् । तत्साधनान्यन्यानि त्रिवर्गसाधनान्यपि विहितानि । सर्व एते नियमा निवृत्तिप्रयोजका एव ॥ भागवत एकादशस्कंधे " व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टेति " प्रतिपादितम् । श्रुतयोपि " त्यागेनैकेऽमृतत्वमानशु "रिति प्रतिपादयंति । तस्मात्पुरुषार्थेषु मोक्ष एव श्रेष्ठइति व्यवसितमाचार्यैः ॥ वस्तुतस्तु सर्वेपि पुरुषार्थाः परस्परोपकारका यावदर्थपरिग्रहविधया संसेविता मोक्षाय संपद्यंते । शरीरवाङ्मनोभिः श्रद्धया विहितैर्विध्ययानुष्ठितैः कर्मभिरंतरात्मा प्रसीदति । प्रसन्ने तस्मिन् स्वस्वश्रद्धानुरूपान् भौमान् दिव्यांश्च कामान् यथाधिकारं पुरुषस्समश्नुते । इदमेव पुरुषार्थप्रयोजनम् । एतदर्थमेव विधिनिषेधात्मकं शास्त्रं प्रवृत्तम् ॥ नन्वस्तु धर्ममोक्षयोरत्यंताप्राप्तयोर्विधायकं शास्त्रम् । रागप्राप्तयोरर्थकामयोः किं विधायकेन शास्त्रेणेति चेत्–रागप्राप्तेष्वपि नियंत्रणाभावे लोकवृत्तेरनवस्था भवेत् । अनवस्थितायां लोकवृत्तौ का प्रसक्तिर्धर्ममोक्षयोः । अतो रागप्राप्तयोरपि तयोर्धर्मार्थं नियंत्रणमावश्यकमेव ॥ अतः शास्त्रमेव बलवदिष्टानुबंधिषु श्रेयोहेतुषु प्रवर्तयति निवर्तयति च बलवदनिष्टानुबंधिभ्यः श्रे-

योविघातकेभ्यः । भृग्वंगिरोमनुहारीतप्रमुखैरवितथवचनैर्लो-
कानुग्रहायैव गृहीतविग्रहैः स्वयमनुष्ठाय प्रदर्शितेन सत्पथेन
संचरंते साधवः ॥ संदिग्धविपर्यस्तबुद्धीनां रजस्तमःप्रकृ-
तीनामपि स एव साधुपथः श्रेयोभ्युदयहेतुः । तमिममर्थमाम-
नंति तैत्तिरीयाः । "अलूक्षा धर्मकामाःस्युः । यथा ते तत्रवर्तेरन् ।
तथा तत्र वर्तेथाः । एष आदेश" इति । इत्थं च स्वरूपानंदा-
विर्भावलक्षणो मोक्षः परमः पुरुषार्थः ॥ तदंतरंगसाधनं धर्मः ।
इष्टापूर्तादिधर्मोपयोगितया अर्थः ॥ तदुभयाविरोधी धर्मप्र-
जासंपत्तिहेतुः काम इति ॥ पूर्वपूर्वापेक्षया प्रत्यवरीणधर्माणः
पुरुषार्थाश्चत्वारः सर्वेषां श्रेयोभ्युदयहेतवः प्रसिद्धाः ॥ यथा-
स्माभिरयमर्थः संगृहीतस्तथा भगवती श्रुतिराभिमुख्येनानुमो-
दते । गर्भाधानपुंसवनप्रमुखैस्संस्कारैः परिपूतशरीरस्य
द्विजन्मनोऽधीतवेदस्य कृतदारसंग्रहस्य यायजूकस्य क्रमेण
विषयपराङ्मुखचेतसः कर्मसहकृतशुद्धसत्वसम्पादितब्रह्मज्ञा-
नस्य सच्चित्स्वरूपेणावस्थितिरेव परमः पुरुषार्थस्त्रैवर्णिकानाम् ।
तदितरेषां स्वस्ववृत्तिधर्मानाश्रित्य सर्वसाधारणैः सत्यास्तेया
दिभिर्वर्तमानानां पुण्योपचयसंपादितोत्तरोत्तरोत्कृष्टजन्मला-
भद्वारा श्रेयोलाभो भविष्यतीति प्रतिपादनायैव कल्पविधिमं-
त्रार्थवादमीमांसान्यायसांख्यधर्मशास्त्रपुराणेतिहासादि निबंध-
नारंभास्सर्वेपि सफलाः ॥

॥ इति श्रीसुब्रह्मण्यशर्मणःकृतिषु पुरुषार्थमीमांसा ॥